श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# SHRIMAD BHAGWAT RASIK KUTUMBA

## Uddhav Geeta, Third Sopan(11.17)



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।
देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्॥

nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam

devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet

नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्॥

nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam

praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param

श्रीमद्भागवतमहापुराणम्

एकादशः स्कन्धः

॥ अथ सप्तदशोऽध्यायः ॥

Śrīmadbhāgawatamahāpurāṇam

Ekādaśḥ skandhaḥ

..atha saptadaśo'dhyāyaḥ..

### उद्धव उवाच

यस्त्वयाभिहितः(फ्) पूर्वं(न्), धर्मस्त्वद्भक्तिलक्षणः ।
वर्णाश्रमाचारवतां(म्), सर्वेषां(न्) द्विपदामपि ॥ 1॥

uddhava uvāca

yastvayābhihitaḥ(ph) pūrvaṃ(n), dharmastvadbhaktilakṣaṇaḥ .

varṇāśramācāravatāṃ(m), sarveṣāṃ(n) dvipadāmapi .. 1..

yas+ tvayā+ bhihitaḥ(ph), dharmas+ tvad+ bhakti+ lakṣaṇaḥ

यथानुष्ठीयमानेन, त्वयि भक्तिर्नृणां(म्) भवेत् ।

स्वधर्मेणारविन्दाक्ष, तत् समाख्यातुमर्हसि ॥ 2॥

yathānuṣṭhīyamānena, tvayi bhaktirnṛṇāṃ(m) bhavet .

svadharmeṇāravindākṣa, tat samākhyātumarhasi .. 2..

svadharmeṇā+ ravindākṣa, samākhyā+ tumar+ hasi

पुरा किल महाबाहो , धर्मं(म्) परमकं(म्) प्रभो ।

यत्तेन हं(व्)सरूपेण, ब्रह्मणेऽभ्यात्थ माधव ॥ 3॥

purā kila mahābāho, dharmaṃ(m) paramakaṃ(m) prabho .

yattena haṃ(v)sarūpeṇa, brahmaṇe'bhyāttha mādhava .. 3..

स इदानीं(म्) सुमहता , कालेनामित्रकर्शन ।

न प्रायो भविता मर्त्य- लोके प्रागनुशासितः ॥ 4॥

sa idānīṃ(m) sumahatā, kālenāmitrakarśana .

na prāyo bhavitā martya- loke prāganuśāsitaḥ .. 4..

kālenā+ mitrakarśana

वक्ता कर्ताविता नान्यो, धर्मस्याच्युत ते भुवि ।

सभायामपि वैरिञ्च्यां(म्), यत्र मूर्तिधराः(ख्) कलाः ॥ 5॥

vaktā kartāvitā nānyo, dharmasyācyuta te bhuvi .

sabhāyāmapi vairiñcyāṃ(m), yatra mūrtidharāḥ(kh) kalāḥ .. 5..

dharmas+ yācyuta, vairiñ+ cyāṃ(m)

कर्त्राविता प्रवक्त्रा च, भवता मधुसूदन ।
त्यक्ते महीतले देव, विनष्टं(ङ्) कः(फ्) प्रवक्ष्यति ॥ 6॥

kartrāvitrā pravaktrā ca, bhavatā madhusūdana .
tyakte mahītale deva, vinaṣṭaṃ(ṅ) kaḥ(ph) pravakṣyati .. 6..

तत्त्वं(न्) नः(स्) सर्वधर्मज्ञ, धर्मस्त्वद्भक्तिलक्षणः ।
यथा यस्य विधीयेत, तथा वर्णय मे प्रभो ॥ 7॥

tattvaṃ(n) naḥ(s) sarvadharmajña, dharmastvadbhaktilakṣaṇaḥ .
yathā yasya vidhīyeta, tathā varṇaya me prabho .. 7..

dharmas+ tvad+ bhakti+ lakṣaṇaḥ

श्रीशुक उवाच

इत्थं(म्) स्वभृत्यमुख्येन, पृष्टः(स्) स भगवान् हरिः ।
प्रीतः(ह्) क्षेमाय मर्त्यानां(न्), धर्मानाह सनातनान् ॥ 8॥

śrīśuka uvāca

itthaṃ(m) svabhṛtyamukhyena, pṛṣṭaḥ(s) sa bhagavān hariḥ .
prītaḥ(h) kṣemāya martyānāṃ(n), dharmānāha sanātanān .. 8..

svabhṛtya+ mukhyena

श्रीभगवानुवाच

धर्म्य एष तव प्रश्नो,नैः(श्)श्रेयसकरो नृणाम् ।
वर्णाश्रमाचारवतां(न्), तमुद्धव निबोध मे ॥ 9॥

śrībhagavānuvāca

dharmya eṣa tava praśno, naiḥ(ś)śreyasakaro nṛṇām .
varṇāśramācāravatāṃ(n), tamuddhava nibodha me .. 9..

varṇāśramā+ cāravatāṃ(n), tamud+ dhava

आदौ कृतयुगे वर्णो, नृणां(म्) हं(व्)स इति स्मृतः ।
कृत्यकृत्याः(फ्) प्रजा जात्या, तस्मात् कृतयुगं(म्) विदुः ॥ 10॥

ādau kṛtayuge varṇo, nṛṇāṃ(m) haṃ(v)sa iti smṛtaḥ .
kṛtakṛtyāḥ(ph) prajā jātyā, tasmāt kṛtayugaṃ(m) viduḥ .. 10..

वेदः(फ्) प्रणव एवाग्रे, धर्मोऽहं(म्) वृषरूपधृक् ।
उपासते तपोनिष्ठा, हं(व्)सं(म्) मां(म्) मुक्तकिल्बिषाः ॥ 11॥

vedaḥ(ph) praṇava evāgre, dharmo'haṃ(m) vṛṣarūpadhṛk .
upāsate taponiṣṭhā, haṃ(v)saṃ(m) māṃ(m) muktakilbiṣāḥ .. 11..

mukta+ kil+ biṣāḥ

त्रेतामुखे महाभाग, प्राणान्मे हृदयात्त्रयी ।
विद्या प्रादुरभूत्तस्या, अहमासं(न्) त्रिवृन्मखः ॥ 12॥

tretāmukhe mahābhāga, prāṇān me hṛdayāttrayī .
vidyā prādurabhūttasyā, ahamāsaṃ(n) trivṛnmakhaḥ .. 12..

hṛdayāt+ trayī, prādurabhūt+ tasyā, trivṛn+ makhaḥ

विप्रक्षत्रियविट्शूद्रा, मुखबाहूरुपादजाः ।
वैराजात् पुरुषाज्जाता, य आत्माचरलक्षणाः ॥ 13॥

viprakṣatriyaviṭśūdrā, mukhabāhūrupādajāḥ .
vairājāt puruṣājjātā, ya ātmācaralakṣaṇāḥ .. 13..

viprakṣatriya+ viṭśūdrā, puruṣāj+ jātā

गृहाश्रमो जघनतो, ब्रह्मचर्यं(म्) हृदो मम ।
वक्षः(स्)स्थानाद् वने वासो, न्यासः(श्) शीर्षणि सं(व्)स्थितः ॥ 14॥

gṛhāśramo jaghanato, brahmacaryaṃ(m) hṛdo mama .
vakṣaḥ(s)sthanād vane vāsaḥ, nyāsaḥ(ś) śīrṣaṇi saṃ(v)sthitaḥ .. 14..

vakṣaḥ(s)+ sthanād

वर्णानामाश्रमाणां(ञ्) च, जन्मभूम्यनुसारिणीः ।
आसन् प्रकृतयो नृणां(न्), नीचैर्नीचोत्तमोत्तमाः ॥ 15॥

varṇānāmāśramāṇāṃ(ñ) ca, janmabhūmyanusāriṇīḥ .
āsan prakṛtayo nṛṇāṃ(n), nīcairnīcottamottamāḥ .. 15..

varṇānā+ māśramāṇāṃ(ñ), janmabhūmya+ nusāriṇīḥ
nīcair+ nīcot+ tamot+ tamāḥ

शमो दमस्तपः(श्) शौचं(म्), सन्तोषः(ह्) क्षान्तिरार्जवम् ।
मद्भक्तिश्च दया सत्यं(म्), ब्रह्मप्रकृतयस्त्विमाः ॥ 16॥

śamo damastapaḥ(ś) śaucaṃ(m), santoṣaḥ(h) kṣāntirārjavam .
madbhaktiśca dayā satyaṃ(m), brahmaprakṛtayastvimāḥ .. 16..

mad+ bhaktiś+ ca, brahma+ prakṛtayas+ tvimāḥ

तेजो बलं(न्) धृतिः(श्) शौर्यं(न्), तितिक्षौदार्यमुद्यमः ।
स्थैर्यं(म्) ब्रह्मण्यतैश्वर्यं(ङ्), क्षत्रप्रकृतयस्त्विमाः ॥ 17॥

tejo balaṃ(n)) dhṛtiḥ(ś) śauryaṃ(n), titikṣaudāryamudyamaḥ .
sthairyaṃ(m) brahmaṇyamaiśvaryaṃ(ṅ), kṣatraprakṛtayastvimāḥ .. 17..

titikṣau+ dārya+ mudyamaḥ, brahmaṇ+ yamaiś+ varyaṃ(ṅ),
kṣatra+ prakṛtayas+ tvimāḥ

आस्तिक्यं(न्) दाननिष्ठा च, अदम्भो ब्रह्मसेवनम् ।
अतुष्टिरर्थोपचयैर्- वैश्यप्रकृतयस्त्विमाः ॥ 18॥

āstikyaṃ(n) dānaniṣṭhā ca, adambho brahmasevanam .
atuṣṭirarthopacayair- vaiśyaprakṛtayastvimāḥ .. 18..

atuṣṭi+ rartho+ pacayair,
vaiśya+ prakṛtayas+ tvimāḥ

शुश्रूषणं(न्) द्विजगवां(न्), देवानां(ञ्) चाप्यमायया ।
तत्र लब्धेन सन्तोषः(श्), शूद्रप्रकृतयस्त्विमाः ॥ 19॥

śuśrūṣaṇaṃ(n) dvijagavāṃ(n), devānāṃ(ñ) cāpyamāyayā .
tatra labdhena santoṣaḥ(ś), śūdraprakṛtayastvimāḥ .. 19..

śūdra+ prakṛtayas+ tvimāḥ

अशौचमनृतं(म्) स्तेयं(न्), नास्तिक्यं(म्) शुष्कविग्रहः ।
कामः(ख्) क्रोधश्च तर्षश्च, स्वभावोऽन्तेवसायिनाम् ॥ 20॥

aśaucamanṛtaṃ(m) steyaṃ(n), nāstikyaṃ(m) śuṣkavigrahaḥ .
kāmaḥ(kh) krodhaśca tarṣaśca, svabhāvo'ntevasāyinām .. 20..

svabhāvo'nte+ vasāyinām

अहिं(व्)सा सत्यमस्तेय- मकामक्रोधलोभता ।
भूतप्रियहितेहा च, धर्मोऽयं(म्) सार्ववर्णिकः ॥ 21॥

ahiṃ(v)sā satyamasteya-makāmakrodhalobhatā .
bhūtapriyahitehā ca, dharmo'yaṃ(m) sārvavarṇikaḥ .. 21..

makāmakrodha+ lobhatā, bhūtapriya+ hitehā

द्वितीयं(म्) प्राप्यानुपूर्व्याज्- जन्मोपनयनं(न्) द्विजः ।
वसन् गुरुकुले दान्तो, ब्रह्माधीयीत चाहुतः ॥ 22॥

dvitīyaṃ(m) prāpyānupūrvyāj- janmopanayanaṃ(n) dvijaḥ .
vasan gurukule dānto, brahmādhīyīta cāhutaḥ .. 22..

prāpyā+ nupūr+ vyāj,

janmo+ panayanaṃ(n)

मेखलाजिनदण्डाक्ष- ब्रह्मसूत्रकमण्डलून् ।
जटिलोऽधौतदद्वासोऽ- रक्तपीठः(ख्) कुशान् दधत् ॥ 23॥

mekhalājinadaṇḍākṣa- brahmasūtrakamaṇḍalūn .
jaṭilo'dhautadadvāso'- raktapīṭhaḥ(kh) kuśān dadhat .. 23..

mekhalā+ jinadaṇḍākṣa, brahmasūtra+ kamaṇḍalūn

jaṭilo'+ dhautadad+ vāso'

स्नानभोजनहोमेषु ,जपोच्चारे च वाग्यतः ।

नच्छिन्द्यान्नखरोमाणि, कक्षोपस्थगतान्यपि ॥ 24॥

snānabhojanahomeṣu, japoccāre ca vāgyataḥ .

nacchindyānnakharomāṇi, kakṣopasthagatānyapi .. 24..

snāna+ bhojana+ homeṣu, japoc+ cāre,

nacchin+ dyān+ nakharo+ māṇi, kakṣopas+ thagatān+ yapi

रेतो नावकिरेज्जातु, ब्रह्मव्रतधरः(स्) स्वयम् ।

अवकीर्णेऽवगाह्याप्सु, यतासुस्त्रिपदीं(ञ्) जपेत् ॥ 25॥

reto nāvakirejjātu, brahmavratadharaḥ(s) svayam .

avakīrṇe'vagāhyāpsu, yatāsustripadīṃ(ñ) japet .. 25..

nāva+ kirej+ jātu,

avakīrṇe'+ vagāh+ yāpsu, yatā+ sustri+ padīṃ(ñ)

अग्न्यर्काचार्यगोविप्र- गुरुवृद्धसुराञ्छुचिः ।

समाहित उपासीत, सन्ध्ये च यतवाग् जपन् ॥ 26॥

अग्+ न्यर् + काचार्य + गोविप्र, गुरु+वृद्ध+सुराञ् +छुचिः

agnyarkācāryagovipra- guruvṛddhasurāñśuciḥ .

samāhita upāsīta, sandhye ca yatavāg japan .. 26..

ag+ nyar+ kācārya+ govipra- guru+ vṛddha+ surāñ+ śuciḥ

आचार्यं(म्) मां(म्) विजानीयान्- नावमन्येत कर्हिचित् ।

न मर्त्यबुद्ध्यासूयेत, सर्वदेवमयो गुरुः ॥ 27॥

ācāryaṃ(m) māṃ(m) vijānīyān- nāvanmanyeta karhicit .

na martyabuddhyāsūyeta, sarvadevamayo guruḥ .. 27..

nāva+ nmanyeta, martya+ buddhyā+ sūyeta

सायं(म्) प्रातरुपानीय, भैक्ष्यं(न्) तस्मै निवेदयेत् ।

यच्चान्यदप्यनुज्ञात- मुपयुं(ञ्)जीत सं(य्)यतः ॥ 28॥

sāyaṃ(m) prātarupānīya, bhaikṣyaṃ(n) tasmai nivedayet .

yaccānyadapyanujñāta- mupayuṃ(ñ)jīta saṃ(y)yataḥ .. 28..

yaccān+ yadapya+ nujñāta

शुश्रूषमाण आचार्यं(म्), सदोपासीत नीचवत् ।

यानशय्यासनस्थानैर्- नातिदूरे कृतां(ञ्)जलिः ॥ 29॥

śuśrūṣamāṇa ācāryaṃ(m), sadopāsīta nīcavat .

yānaśayyāsanasthānair- nātidūre kṛtāṃ(ñ)jaliḥ .. 29..

yānaśayyā+ sanas+ thānair, kṛtāṃ(ñ)+ jaliḥ

एवं(व्)वृत्तो गुरुकुले, वसेद् भोगविवर्जितः ।

विद्या समाप्यते यावद्, बिभ्रद् व्रतमखण्डितम् ॥ 30॥

evaṃ(v)vṛtto gurukule, vased bhogavivarjitaḥ .

vidyā samāpyate yāvad, bibhrad vratamakhaṇḍitam .. 30..

vrata+ makhaṇḍitam

यद्यसौ छन्दसां(म्) लोक- मारोक्ष्यन् ब्रह्मविष्टपम् ।

गुरवे विन्यसेद् देहं(म्), स्वाध्यायार्थं(म्) बृहद्व्रतः ॥ 31 ॥

yadyasau chandasāṃ(m) loka- mārokṣyan brahmaviṣṭapam .

gurave vinyased dehaṃ(m), svādhyāyārthaṃ(m) bṛhadvrataḥ .. 31..

brahma+ viṣṭapam,

svādhyā+ yārthaṃ(m), bṛhad+ vrataḥ

अग्नौ गुरावात्मनि च, सर्वभूतेषु मां(म्) परम् ।

अपृथग्धीरुपासीत, ब्रह्मवर्चस्व्यकल्मषः ॥ 32॥

agnau gurāvātmani ca, sarvabhūteṣu māṃ(m) param .

apṛthagdhīrupāsīta, brahmavarcasvyakalmaṣaḥ .. 32..

gurā+ vātmani, apṛthagdhī+ rupāsīta,

brahmavarcas+ vyakalmaṣaḥ

स्त्रीणां(न्) निरीक्षणस्पर्श- सं(ल्)लापक्ष्वेलनादिकम् ।
प्राणिनो मिथुनीभूता- नगृहस्थोऽग्रतस्त्यजेत् ॥ 33॥

strīṇāṃ(n) nirīkṣaṇasparśa- saṃ(l)lāpakṣvelanādikam .
prāṇino mithunībhūtā- nagṛhastho'gratastyajet .. 33..

nirīkṣaṇas+ parśa, saṃ(l)lā+ pakṣve+ lanādikam
nagṛhastho'+ gratas+ tyajet

शौचमाचमनं(म्) स्नानं(म्), सन्ध्योपासनमार्जवम् ।
तीर्थसेवा जपोऽस्पृश्या- भक्ष्यासं(म्)भाष्यवर्जनम् ॥ 34॥

śaucamācamanaṃ(m) snānaṃ(m), sandhyopāsanamārjavam .
tīrthasevā japo'spṛśyā- bhakṣyāsaṃ(m)bhāṣyavarjanam .. 34..

śaucamā+ camanaṃ(m), sandhyopā+ sana+ mārjavam
bhakṣyā+ saṃ(m)bhāṣya+ varjanam

सर्वाश्रमप्रयुक्तोऽयं(न्), नियमः(ख्) कुलनन्दन ।
मद्भावः(स्) सर्वभूतेषु, मनोवाक्कायसं(य्)यमः ॥ 35॥

sarvāśramaprayukto'yaṃ(n), niyamaḥ(kh) kulanandana .
madbhāvaḥ(s) sarvabhūteṣu, manovākkāyasaṃ(y)yamaḥ .. 35..

sarvāśrama+ prayukto'yaṃ(n), manovāk+ kaya+ saṃ(y)yamaḥ

एवं(म्) बृहद् व्रतधरो, ब्राह्मणोऽग्निरिव ज्वलन् ।
मद्भक्तस्तीव्रतपसा, दग्धकर्माशयोऽमलः ॥ 36॥

evaṃ(m) bṛhad vratadharo, brāhmaṇo'gniriva jvalan .
madbhaktastīvratapasā, dagdhakarmāśayo'malaḥ .. 36..

brāhmaṇo'g+ niriva, mad+ bhaktas+ tīvra+ tapasā, dagdha+ karma+ śayo'malaḥ

अथानन्तरमावेक्ष्यन्, यथा जिज्ञासितागमः ।
गुरवे दक्षिणां(न्) दत्त्वा, स्नायाद् गुर्वनुमोदितः ॥ 37॥

athānantaramāvekṣyan, yathā jijñāsitāgamaḥ .

gurave dakṣiṇāṃ(n) dattvā, snāyād gurvanumoditaḥ .. 37..

athā+ nanta+ ramāvekṣyan

गृहं(म्) वनं(म्) वोपविशेत्, प्रव्रजेद् वा द्विजोत्तमः ।

आश्रमादाश्रमं(ङ्) गच्छेन्, नान्यथा मत्परश्चरेत् ॥ 38॥

gṛhaṃ(m) vanaṃ(m) vopaviśet, pravrajed vā dvijottamaḥ .

āśramādāśramaṃ(ṅ) gacchen, nānyathā matparaścaret .. 38..

āśramā+ dāśramaṃ(ṅ), matparaś+ caret

गृहार्थी सदृशीं(म्) भार्या- मुद्वहेदजुगुप्सिताम् ।

यवीयसीं(न्) तु वयसा, तां(म्) सवर्णामनुक्रमात् ॥ 39॥

gṛhārthī sadṛśīṃ(m) bhāryā- mudvahedajugupsitām .

yavīyasīṃ(n) tu vayasā, tāṃ(m) savarṇāmanukramāt .. 39..

mudvahe+ dajugup+ sitām,

savarṇā+ manukramāt

इज्याध्ययनदानानि, सर्वेषां(ञ्) च द्विजन्मनाम् ।

प्रतिग्रहोऽध्यापनं(ञ्) च, ब्राह्मणस्यैव याजनम् ॥ 40॥

Ijyādhyayanadānāni, sarveṣāṃ(ñ) ca dvijanmanām .

pratigraho'dhyāpanaṃ(ñ) ca, brāhmaṇasyaiva yājanam .. 40..

Ijyādhyaya+ nadānāni, dvijan+ manām,

pratigraho'+ dhyāpanaṃ(ñ), brāhmaṇas+ yaiva

प्रतिग्रहं(म्) मन्यमानस्- तपस्तेजोयशोनुदम् ।

अन्याभ्यामेव जीवेत, शिलैर्वा दोषदृक् तयोः ॥ 41॥

pratigrahaṃ(m) manyamānas-tapastejoyaśonudam .

anyābhyāmeva jīveta, śilairvā doṣadṛk tayoḥ .. 41..

tapas+ tejo+ yaśonudam

ब्राह्मणस्य हि देहोऽयं(ङ्), क्षुद्रकामाय नेष्यते ।
कृच्छ्राय तपसे चेह, प्रेत्यानन्तसुखाय च ॥ 42॥

brāhmaṇasya hi deho'yaṃ(ṅ), kṣudrakāmāya neṣyate .
kṛcchrāya tapase ceha, pretyānantasukhāya ca .. 42..

pretyā+ nanta+ sukhāya

शिलोञ्छवृत्त्या परितुष्टचित्तो,
धर्मं(म्) महान्तं(म्) विरजं(ञ्) जुषाणः ।
मय्यर्पितात्मा गृह एव तिष्ठन्,
नातिप्रसक्तः(स्) समुपैति शान्तिम् ॥ 43॥

śiloñchavṛttyā parituṣṭacitto
dharmaṃ(m) mahāntaṃ(m) virajaṃ(ñ) juṣāṇaḥ .
mayyarpitātmā gṛha eva tiṣṭhan
nātiprasaktaḥ(s) samupaiti śāntim .. 43..

śiloñ+ chavṛttyā

समुद्धरन्ति ये विप्रं(म्), सीदन्तं(म्) मत्परायणम् ।
तानुद्धरिष्ये नचिरा- दापद्भ्यो नौरिवार्णवात् ॥ 44॥

samuddharanti ye vipraṃ(m), sīdantaṃ(m) matparāyaṇam .
tānuddhariṣye nacirā- dāpadbhyo naurivārṇavāt .. 44..

samud+ dharanti, tānud+ dhariṣye, naurivār+ ṇavāt

सर्वाः(स्) समुद्धरेद् राजा, पितेव व्यसनात् प्रजाः ।
आत्मानमात्मना धीरो, यथा गजपतिर्गजान् ॥ 45॥

sarvāḥ(s) samuddhared rājā, piteva vyasanāt prajāḥ .
ātmānamātmanā dhīro, yathā gajapatirgajān .. 45..

samud+ dhared, ātmā+ namātmanā

एवं(व्)विधो नरपतिर्- विमानेनार्कवर्चसा ।
विधूयेहाशुभं(ङ्) कृत्स्न- मिन्द्रेण सह मोदते ॥ 46॥

evaṃ(v)vidho narapatir- vimānenārkavarcasā .
vidhūyehāśubhaṃ(ṅ) kṛtsna- mindreṇa saha modate .. 46..

vimāne+ nārka+ varcasā, vidhūye+ hāśubhaṃ(ṅ)

सीदन् विप्रो वणिग्वृत्त्या, पण्यैरेवापदं(न्) तरेत् ।
खड्गेन वाऽऽपदाक्रान्तो, न श्ववृत्त्या कथं(ञ्)चन ॥ 47॥

sīdan vipro vaṇigvṛttyā, paṇyairevāpadaṃ(n) taret .
khaḍgena vā''padākrānto, na śvavṛttyā kathaṃ(ñ)cana .. 47..

vaṇig+ vṛttyā, paṇyai+ revā+ padaṃ(n)

वैश्यवृत्त्या तु राजन्यो, जीवेन्मृगययाऽऽपदि ।
चरेद् वा विप्ररूपेण, न श्ववृत्त्या कथं(ञ्)चन ॥ 48॥

vaiśyavṛttyā tu rājanyo, jīvenmṛgayayā''padi .
cared vā viprarūpeṇa, na śvavṛttyā kathaṃ(ñ)cana .. 48..

jīven+ mṛga+ yayā''padi

शूद्रवृत्तिं(म्) भजेद् वैश्यः(श्), शूद्रः(ख्) कारुकटक्रियाम् ।
कृच्छ्रान्मुक्तो न गर्ह्येण, वृत्तिं(म्) लिप्सेत कर्मणा ॥ 49॥

śūdravṛttiṃ(m) bhajed vaiśyaḥ(ś), śūdraḥ(kh) kārukaṭakriyām .
kṛcchrānmukto na garhyeṇa, vṛttiṃ(m) lipseta karmaṇā .. 49..

kṛcchrān+ mukto

वेदाध्यायस्वधास्वाहा- बल्यन्नाद्यैर्यथोदयम् ।
देवर्षिपितृभूतानि, मद्रूपाण्यन्वहं(म्) यजेत् ॥ 50॥

Vedādhyāyasvadhāsvāhā- balyannādyairyathodayam .
devarṣipitṛbhūtāni, madrūpāṇyanvahaṃ(m) yajet .. 50..

vedādhyāyas+ vadhāsvāhā, balyannā+ dyair+ yathodayam

यदृच्छयोपपन्नेन, शुक्लेनोपार्जितेन वा ।

धनेनापीडयन् भृत्यान्, न्यायेनैवाहरेत् क्रतून् ॥ 51॥

yadṛcchayopapannena, śuklenopārjitena vā .

dhanenāpīḍayan bhṛtyān, nyāyenaivāharet kratūn .. 51..

yadṛc+ chayo+ papannena, śukle+ nopār+ jitena, nyāye+ naivāharet

कुटुम्बेषु न सज्जेत, न प्रमाद्येत् कुटुम्ब्यपि ।

विपश्चिन्नश्वरं(म्) पश्ये- ददृष्टमपि दृष्टवत् ॥ 52॥

kuṭumbeṣu na sajjeta, na pramādyet kuṭumbyapi .

vipaścinnaśvaraṃ(m) paśye- dadṛṣṭamapi dṛṣṭavat .. 52..

kuṭum+ byapi, vipaś+ cin+ naśvaraṃ(m)

पुत्रदाराप्तबन्धूनां(म्), सं(ङ्)गमः(फ्) पान्थसं(ङ्)गमः ।

अनुदेहं(म्) वियन्त्येते, स्वप्नो निद्रानुगो यथा ॥ 53॥

putradārāptabandhūnāṃ(m), saṃ(ṅ)gamaḥ(ph) pānthasaṃ(ṅ)gamaḥ .

anudehaṃ(m) viyantyete, svapno nidrānugo yathā .. 53..

putradā+ rāpta+ bandhūnāṃ(m)

इत्थं(म्) परिमृशन्मुक्तो, गृहेष्वतिथिवद् वसन् ।

न गृहैरनुबध्येत, निर्ममो निरहं(ङ्)कृतः ॥ 54॥

itthaṃ(m) parimṛśanmukto, gṛheṣvatithivad vasan .

na gṛhairanubadhyeta, nirmamo nirahaṃ(ṅ)kṛtaḥ .. 54..

parimṛśan+ mukto, gṛheṣ+ vatithi+ vad

gṛhai+ ranubadhyeta

कर्मभिर्गृहमेधीयै- रिष्ट्वा मामेव भक्तिमान् ।

तिष्ठेद् वनं(म्) वोपविशेत्, प्रजावान् वा परिव्रजेत् ॥ 55॥

karmabhirgṛhamedhīyai- riṣṭvā māmeva bhaktimān .

tiṣṭhed vanaṃ(m) vopaviśet, prajāvān vā parivrajet .. 55..

karmabhir+ gṛhamedhīyai

यस्त्वासक्तमतिर्गेहे, पुत्रवित्तैषणातुरः ।

स्त्रैणः(ख्) कृपणधीर्मूढो, ममाहमिति बध्यते ॥ 56॥

yastvāsaktamatirgehe, putravittaiṣaṇāturaḥ .

straiṇaḥ(kh) kṛpaṇadhīrmūḍho, mamāhamiti badhyate .. 56..

yastvā+ sakta+ matir+ gehe,

putravittai+ ṣaṇāturaḥ

अहो मे पितरौ वृद्धौ, भार्या बालात्मजाऽऽत्मजाः ।

अनाथा मामृते दीनाः(ख्), कथं(ञ्) जीवन्ति दुःखिताः ॥ 57 ॥

Aho me pitarau vṛddhau, bhāryā bālātmajā''tmajāḥ .

anāthā māmṛte dīnāḥ(kh), kathaṃ(ñ) jīvanti duḥkhitāḥ .. 57..

bālāt+ majā''t+ majāḥ

एवं(ङ्) गृहाशयाक्षिप्त- हृदयो मूढधीरयम् ।

अतृप्तस्तराननुध्यायन्, मृतोऽन्धं(म्) विशते तमः ॥ 58॥

evaṃ(ṅ) gṛhāśayākṣipta- hṛdayo mūḍhadhīrayam .

atṛptastānanudhyāyan, mṛto'ndhaṃ(m) viśate tamaḥ .. 58..

atṛptastā+ nanudhyāyan

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)

संहितायामेकादशस्कन्धे सप्तदशोऽध्यायः ॥ 17॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(v)syāṃ(m)

saṃhitāyāmekādaśaskandhe saptadaśo'dhyāyaḥ .. 17..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्) पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः(श्) शान्तिः(श्) शान्तिः ॥

**Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|**

**Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||**

**Om Shāntih(ś) Shāntih(ś) Shāntih ||**

